बोधने विवेकसामर्थ्ये। १३अहंब्रह्मेत्युपासने। तच्चोपासनम् "ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः। नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः। निर्विकारो निराकारो निरवद्योऽहमव्ययः। नाहं देह इत्यादि। निरामयो निराभासो निर्विकल्पोऽहमाततः। नाहमित्यादि। निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः। नाहमित्यादि। निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः। नाहमित्यादि। वेदान्तशास्त्रोक्तं बोध्यम्। १४शब्दयुक्तिभ्यामात्मनिश्चये। "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्। आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः। इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च। जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्। असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु। नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु। मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि। अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" इति गीतोक्तार्थेषु १५ज्ञानसाधनेषु। तच्च सात्त्विकादिभेदात् त्रिविधम्। यथा "सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्"। (सात्त्विकं सर्वसंसारोच्छित्तिकारणम्)। "पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्। यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहेतुकम्। अतत्त्वार्थवदल्पञ्च तत् तामसमुदाहृतम्"। ( राजसं तामसञ्च संसारकारणम् )। आत्मनः श्रवणमननाभ्यां परिनिष्पन्ने प्रमाणजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे १६परमात्मज्ञानसाधनशास्त्रादात्मतत्त्वस्यावगमे आत्मसाक्षात्कारे "लोकवासनया जन्तोः शास्त्रवासनयापि च। देहवासनया ज्ञानं यथावन्नैव जायते। ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः" "यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि" इति ब्रह्मसाक्षात्काररूपज्ञानहेतुरुक्तः। १७साङ्गवेदतदर्थविषयेऽवबोधे। महावाक्यजन्याखण्डाकारायां १८बुद्धिवृत्तौ १९स्वस्वरूपस्फुरणे। सांख्यमते गुणपुरुषान्यताख्यातिरूपे २०अध्यवसाये। ज्ञायतेऽनेन। ज्ञा—करणे ल्युट्। २१वेदे २२शास्त्रादौ च। तत्र प्रत्यक्षज्ञानोत्पत्तिप्रकारो मतभेदेन निरूप्यते। तत्र नैयायिकैः "आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियं विषयेण तस्मात्प्रत्यक्षम्" इत्युक्तदिशा प्रत्यक्षं जायते। व्याप्तिज्ञानपरामर्शोत्तरमनुमितिर्जायते। वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितौ शाब्दबोधो जायते। गवादौ गोसादृश्यज्ञानेन गोसदृशो गवय इत्यादिना अतिदिष्टवाक्यार्थस्य स्मृतौ गवयो गवयवाच्य इत्यादि रीत्या उपमितिज्ञानं जायते इत्यङ्गीकृतम्। केचित् बौद्धभेदाः बाह्यार्थाभावेन बुद्धेरेव तत्तदर्थाकारतयावभास इत्यङ्गीचक्रुः" यथोक्तं सर्वद० स०

"बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः। अर्थोज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च। किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा। न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात्। न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यथोक्तम् "षट्केन युगपद्योगात् परमाणोः षडंशता। तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति। तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम् "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः। ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते" इति। ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन, तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते चैते नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः। अत्राप्यनादिरविच्छिन्नप्रवाहा भेदवासनैव निमित्तम्। यथोक्तम् "सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय" इति। "अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" न च रसवीर्य्यविपाकादिसमानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिराद्युपहताक्ष्णां केशेन्द्रनाडीज्ञानाभेदवदनाद्युपप्लववासनासामर्थ्याद्व्यवस्थोपपत्तेः पर्य्यनुयोगायोगात्। यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते। विभक्तलक्षणग्राह्य-